

# द्वितीयः पाठः । व्यसने मित्रपरीक्षा ।

हितोपदेशात् स्वीकृता एषा कथा । हितोपदेशस्य कर्ता नारायणपण्डितः। हितोपदेशस्य चत्वारः विभागाः सन्ति । १) मित्रलाभः २) सुहृद्भेदः ३) विग्रहः ४) सन्धिः । ग्रन्थेऽस्मिन् पशुपक्षिणां कथामाध्यमेन नीतिवचनानि बोधितानि ।



अस्ति एकं चम्पकं नाम अरण्यम् । अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म। एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः । क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः । मृगशृगालौ दृष्ट्वा काकोऽवदत्, ''सखे चित्राङ्ग! कोऽयं द्वितीयः ?'' मृगः **अब्रूत**, ''जम्बूकोऽयम्। अस्मत्सख्यम् इच्छति।'' काकः उपादिशत्, ''अकस्मादागन्तुना सह मित्रता न युक्ता।'' तदाकर्ण्य जम्बूकः सकोपम् **आह**, ''मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत्। यथायं मृगः मम बन्धुः तथा भवानपि।'' मृगः **अब्रवीत्**, ''अलं

विवादेन । वयं सर्वे आनन्देन एकत्र निवसामः।'' काकेनोक्तम्, ''एवमस्तु।''

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत्, 'वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।' तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत् । तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः । तत्रागतः मृगः पाशैर्बद्धः । सः अचिन्तयत्, ''इदानीं मित्राण्येव शरणं मम ।'' दूरात् तत् पश्यन् जम्बूकः मनसि आनन्दितः। सोऽचिन्तयत्, ''फलितः मे मनोरथः । इदानीं प्रभूतं भोजनं प्राप्स्यामि ।'' मृगस्तं दृष्ट्वा **अब्रवीत्**, ''मित्र, छिन्धि तावन्मम बन्धनम् । त्रायस्व माम् ।'' जम्बूको दूरादेवावदत्, ''मित्र, दृढोऽयं बन्धः । स्नायुनिर्मितान् पाशानेतान् कथं वा व्रतदिवसे स्पृशामि?'' इत्युक्त्वा सः समीपमेव वृक्षस्य पृष्ठतः निभृतं स्थितः ।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः । मृगं तथाविधं दृष्ट्वा स **उवाच**, ''सखे! किमेतत्?'' मृगेणोक्तम्, ''सुहृद्वाक्यस्य अनादरात् बद्धोऽहम् । उक्तं च –

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ।।''

काकः **अब्रूत**, ''स वञ्चकः क्वास्ते?'' मृगेणोक्तम्, ''मन्मांसार्थी तिष्ठत्यत्रैव।'' काकः उक्तवान्, ''उपायस्तावत् चिन्तनीयः।''

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तः आगच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्, ''सखे मृग, त्वमात्मानं मृतवत्संदर्शय । वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे ।'' मृगस्तथैव स्थितः ।

क्षेत्रपतिना मृगः आलोकितः उक्तश्च, ''आः! स्वयं मृतोऽसि!'' सः मृगं बन्धनात् व्यमुञ्चत् । ततः काकशब्दं श्रुत्वा मृगः सत्वरं पलायितः । तमुद्दिश्य क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालस्तावद् हतः ।

## भाषाभ्यासः



### १. पूर्णवाक्येन उत्तरं लिखत।

अ) अरण्ये कौ निवसतः स्म ?
आ) काकः किम् उपादिशत् ?
इ) मृगः प्रत्यहं क्षेत्रं गत्वा किम् अकरोत् ?
ई) क्षुद्रबुद्धिः कुत्र निभृतं स्थितः ?
उ) शृगालः केन हतः ?

### २. कः कं वदति ?

अ) 'वनेऽस्मिन् एकं सस्यपूर्णं क्षेत्रमस्ति ।'
आ) 'मित्र, छिन्धि तावन्मम बन्धनम् ।'
इ) 'स वञ्चकः क्वास्ते ?'

### ३. प्रश्ननिर्माणं कुरुत ।

अ) शृगालः मृगेण सह मित्रताम् ऐच्छत् ।
आ) प्रदोषकाले मृगमन्विष्यन् काकः क्षेत्रे उपस्थितः।
इ) सः वृक्षस्य पृष्ठतः निभृतं स्थितः।

### ४. उत्तरपदं लिखत ।

अ) काकोऽवदत् = काकः + ______ ।
आ) मृगेणोक्तम् = मृगेण + ______ ।
इ) जम्बूकोऽयम् = जम्बूकः + ______ ।

### ५. पूर्वपदं लिखत ।

अ) मृगोऽब्रवीत् = ______ + अब्रवीत् ।
आ) वातेनोदरम् = ______ + उदरम् ।
इ) मृतोऽसि = ______ + असि ।

### ६. सूचनानुसारं कृती: कुरुत ।

अ) मृग: प्रत्यहं तत्र गत्वा सस्यम् अखादत् । (त्वान्त-अव्ययं निष्कासयत ।)

आ) मित्र छिन्धि तावन्मम बन्धनम् । (लकारं लिखत ।)

इ) वयम् आनन्देन एकत्र निवसाम: । (लट्लकारस्थाने लङ्लकारं योजयत ।)

ई) त्वं पादान्स्तब्धीकृत्य तिष्ठ । ('त्वं' स्थाने 'भवान्' योजयत ।)


उ) भवानपि अपरिचित: एव आसीत् । ('भवान्' स्थाने 'त्वं' योजयत ।)

ऊ) त्वं सत्वरं पलायिष्यसे । ('त्वं' स्थाने 'भवान्' योजयत ।)

### ७. स्तम्भमेलनं कुरुत ।

| विशेषणम् | विशेष्यम् |
|---|---|
| दृढ: | लगुडेन |
| क्षिप्तेन | दिने |
| एकस्मिन् | मृग: |
| लगुडहस्त: | बन्ध: |
| | क्षेत्रपति: |

### ८. जालरेखाचित्रं पूरयत ।




### ९. तालिकां पूरयत ।

| वक्त्रा संवादं मेलयत | |
|---|---|
| जम्बूक: | मृग: |
| | |
| | |

(मञ्जूषा - त्रायस्व माम्, दर्शयामि त्वाम्, दृढोऽयं बन्ध:, छिन्धि मम बन्धनम्)

| वक्त्रा संवादं मेलयत | |
|---|---|
| मृग: | काक: |
| | |
| | |

(मञ्जूषा - अलं विवादेन, कोऽयं द्वितीय:?, एवमस्तु, अस्मत्सख्यम् इच्छति ।)

### १०. माध्यमभाषया उत्तरत ।

अ) 'स नर: शत्रुनन्दन:' इति वचनं कथाया: आधारेण स्पष्टीकुरुत ।

आ) काकेन क: उपाय: उक्त: ?

### ११. अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत ।

अ) अरण्ये मृग: काक: च स्नेहेन निवसत: ।

आ) जम्बूक: तेन सह मृगस्य निवासस्थानं गत: ।

इ) मृगमन्विष्यन् काक: तत्र उपस्थित: ।

### १२. विरुद्धार्थकशब्दं लिखत ।

दृढ:, मैत्री, बद्ध:, प्रभूतम् ।

**उपक्रम :**

१. पाठात् उपपदविभक्तियुक्तानि वाक्यानि चित्वा लिखत ।

२. पाठात् शतृरूपाणि चित्वा लिखत ।

722BSL